लग्नेचोपचयस्थितैरविमुखै प्रारभवत्सस्थितैसूर्येवामगतेस्वदिग्वदनभैर्वेश्मप्रवेशःशुभ ॥ रंध्रेपुद्विभवेभ्य आसुतगत सूर्योयदास्यात्तदापूर्वाद्यायननमालयंप्रविशतांस्याद्वामगोसौक्रमात् ॥ २१॥ इतिश्रीनारायणदै वज्ञविरचितेमुहूर्तमार्तंडेवास्तुप्रकरणंसमाप्तम् ॥ इति उपचयस्थिरेलग्नेजन्मर्क्षजन्मलग्नाभ्यांउपचयावहस्थिरेलग्नवेश्मप्रवे

श शुभ स्यात् कैः रविमुखैःसूर्यार्थैःपारंभवत्सस्थिते गृहारंभार्थमुक्तद्वस्संस्थितैरित्यर्थःकस्मिन्सति सूर्येवामगतेसति पुनःकैः स्वदिग्वदनभै पारिशेषमूहंतद्विमुखैः प्रवेशोदितैर्नक्षत्रैरित्यर्थः अथवामसूर्यलक्षणमाह रंध्रइति रंध्रेषु ५ द्वि२ भवे११ भ्यःलग्नादिअष्टमपंचमद्वितीयैकादशे भ्य सकाशात ८ आसुतगतःआपंचमगत सूर्योयदास्यात्तदापूर्वाद्यानननमालयंपूर्वोदिमुखंगृहप्रविशतांमनुष्याणांअसौसूर्यः क्रमाद्वामगत स्यात् एतदुक्तंभवति अष्टमात्पंचमपर्यंतंवर्तमानोर्कःपूर्वामुखगृहेप्रविशतांवामोभवति पंचमात्पंचमगतोदक्षिणामुखेगृहेप्रविशतांवामोभवतीत्यर्थः ॥ २१ ॥

इतिस्वोक्तमुहूर्त्तमार्तंडटीकायांमार्तंडवल्लभायांवास्तुप्रकरणंसमाप्तं ॥ ॥ अथयात्राप्रकरणंव्याख्यायतेतत्रादौयस्मिन्कालेयात्राकर्तव्येत्याह सुद
शासु शोभनादशातर्दशाविदशोपदशासु उपचयावहस्यग्रहस्यवारेगोचराष्टकवर्गादौशुभफलग्रहस्यवारेप्रयाणमिष्टंशुभंजगुराचार्याः क्रेषु कर्णो
त्यादितिभद्विकेषु कर्णःश्रवणःअंत्यरेवती अदितिर्मंपुनर्वसुः एषाद्विकाःश्रवणधनिष्ठेरेवत्यश्विन्यौपुनर्वसुपुष्यौ एष्वित्यर्थः पुनःक्रेषु मृगमैत्रार्केषु

अथमुहूर्तमार्तंडेयात्राप्रकरणंप्रारभ्यते ॥ ॥ वारेचोपचयावहस्यसुदशास्विष्टप्रयाणंजगुःकर्णात्या
दितिभद्विकेषुमृगमैत्रार्केषुनोजन्मभे ॥ सार्पार्द्राग्नियमाजपादपितृषुत्वाष्ट्रत्रयेचाशुभंरिक्ता ४, ९, १४
पर्व १५, ३० गुहा ६ षष्टमी ८ हरि १२ सितास्येषुज्ञशुक्रोन्मुखम् ॥ १ ॥ ॥ ॥

मृगःप्रसिद्धः मैत्रमनुराधा अर्कोहस्तः एषुनवनक्षत्रेषुप्रयाणंशुभमित्यर्थः तत्रविशेषमाह नोजन्मभइति जन्मभेजन्मनक्षत्रेश्रवणाद्यन्यतमेपियानं
शुभनोजगुः अथयेषुअशुभंतान्याह सार्पेति सार्पमाश्लेषा आर्द्राप्रसिद्धा अग्निःकृत्तिका यमोभरणी अजैकपात् पूर्वाभाद्रपदा पितरोमघा त्वा
ष्ट्रत्रये चित्रात्रयेच एषुनवनक्षत्रेषुयानअशुभंजगुः अन्यानिनवनक्षत्राणिमध्यमानीत्यर्थतःसिद्धम् अथयासुतिथिषुअशुभंतदाहरिक्तेति चतु
र्थीनवमीचतुर्दश्यः पर्वणीपूर्णिमामावास्ये गुहःषष्ठी अष्टमीप्रसिद्धा हरिर्द्वादशी सितास्यंशुक्लप्रतिपत् तेप्रयाणयानमशुभंजगुः अर्थादन्यासु

तिथिशुद्धं अम्पवुष्टमाह ज्ञेति ज्ञोबुधःशुक्र प्रसिद्धः तयोरुन्मुखंसंमुखयानंउक्तेष्वपितियिनक्षत्रादिषुमानमङ्गमंजगु बुधशुक्रसंमुखगमननंनकर्त व्यमित्यर्थः ॥ १॥ अपशूलानाह प्रागीति प्राक्पूर्वस्यांदिशिचंद्रासितशक्रभंत्यजेत् चंद्रःसोमवारः असितः शनिवार शक्रभंज्येष्ठा एतत्पर्य पूर्वदिशित्यजेदित्यर्थः अपाक्दक्षिणस्यां वसुपरार्द्धात् धनिष्ठोत्तरार्द्धात्पचनक्षत्राणि ईज्योबृहस्पतिवार एतान्दक्षिणस्यांत्यजेत् पश्चा त्यभिमायांदिशिकार्कासितान्त्यजेत् क.रोहिणी अर्कोरवि· सितःशुक्रः एतान्पश्चिमायांत्यजेदित्यर्थः उदक् उत्तरस्यांदिशि कुजबुधार्यम्ण

प्राक्चद्रासितशक्रभंवसुपरार्द्धात्पंचभेज्यानपाक्पश्चात्कार्कासितानुदक्कुजबुधार्यम्णस्त्यजेच्छूलकान् ॥
त्रिंशाष्टौनवभूमयोग्निगिरिशाविश्वेपवोऽर्कोव्यय पट्शक्रास्तिथिपर्वतादशदशोप्येतांस्तिथीनाशत ॥ २ ॥

स्त्यजेत् कुजोमगलवार बुध.प्रसिद्ध अर्यमानामोत्तराफाल्गुनी एतान्शूलकान्उत्तरस्यांत्यजेत् शूलपदस्यप्रत्येकंसंबधः अथयोगिनीमा ह त्रिंशाष्टाविति एता॰प्रत्येकपदगतान् तिथीन् ईशतः ईशान्या सकाशात्प्रदक्षिणक्रमेणज्ञेयाःएतासितिथीन्त्यजेत्।एतेके त्रिंशा ३ ष्टौ ८ई शान्यानव ९भूमयः१ प्राच्यांअग्नि ३गिरिशाः११ आग्नेय्यांविश्वे १३पवः५दक्षिणस्यांअर्कोव्यय: १२,२ नैर्ऋत्यांपूट६षाकाः १४ पश्चिमायांतिथी १५पर्वताज्ञेयाश्चदश१०दशा२उत्तरस्यां अर्थाकन्यासएवम्प्रकृतम् ॥ २ ॥ अथान्यविषयमाह ईज्येति ईज्यादिपुष्यभिमातृकाषि

कायाःसकाशात्सप्तसप्तभगणोभवेत् एतदुक्तंभवति सप्तशलाकाचक्रंनिष्पाद्यपूर्वगतासुसप्तसुरेखासुईशानतःकृत्तिकादीनिसप्तनक्षत्राणिन्यसेत् तत्पुरस्थानिसप्तदक्षिणगतरेखासुन्यसेत् एवपश्चिमोत्तररेखासुक्रमेणन्यसेत् ततोवायव्याग्नेयादिग्गतारेखाकुर्यात् अस्यारेखायाः परिघइति सज्ञा एवंनिष्पादितेचक्रप्रयोजनमाह वाय्वग्निकाष्ठास्थितइति वायुःप्रसिद्धःअग्निःप्रसिद्धः अनयोःकाष्ठेदिशौवायव्याग्नेय्यो तत्रस्थितःपरिघः नोल्लङ्घ्यः अथान्यत्प्रयोजनमाह अपागीति अपाक्दक्षिणस्यावरुणभैःप्रतीच्यैर्नक्षत्रैर्नव्रजेत्प्राच्यैर्नक्षत्रैः उदक्उत्तरास्यादिशिनव्रजेत् नगच्छे

ऐंद्र्याद्यग्निभसप्तसप्तभगणोवाय्वग्निकाष्ठास्थितोनोल्लंघ्यःपरिघस्त्वपाक्वरुणभैःप्राच्यैरुदङ्नव्रजेत् ॥
सर्वाशासुरवीज्यमित्रतुरगैर्यायादथावश्यकेहित्वाशूलमनिष्टभैर्यदिनिजाशेष्टांगलब्धिर्व्रजेत् ॥ ३ ॥

त् तत्तद्दिक्स्थापितनक्षत्रैस्तत्तद्दिग्गमनंसिद्धमेव सर्वासुसर्वादिक्षुरवीज्यमित्रतुरगैर्यायात् रविर्हस्तः ईज्यःपुष्यः मित्रमनुराधा तुरगोश्विनी एभिर्नक्षत्रैः सर्वासुदिक्षुगमनशुभमित्यर्थः अथावश्यकेकृत्येअस्यापवादमाह अथावश्यकेति आवश्यकेकृत्येसातेनिंद्यैःअनिष्टभैः यद्दिक्षुयानिनिंद्यानितैः पूर्वोक्तैर्नक्षत्रैस्तस्यातस्यांदिशितदाव्रजेत् तदाकदा यदानिजाशेष्टागलब्धिर्भवेत् निजाशायानिजगमनदिशायाइष्टागलाब्धिः इष्टलग्नलाभःस्यात् इष्टलग्नवक्ष्यमाणलक्षणं तद्यथोक्तं गुणसपन्नयदास्यात्तदागच्छेदित्यर्थः नोचेन्नेत्यर्थात्सिद्धं किंकृत्वा शूलमंहित्वा पूर्वोक्तशू

लनतेऽर्थः मूलनक्षत्रमेसति निजाशोद्भंगलस्यावपिनगच्छेदित्यर्थः ॥ १ ॥ अथान्यदाह मिश्रास्यैरिति दिनादिमलवेषिषावमक्षत्स्यदिन स्यापशे मिश्रास्ये साधारणेनक्षत्रैः ध्रुवमैमनइपात्नगच्छेत् द्वितीयभागेतीक्ष्णैः अंतिमेतृतीयभागेक्षिप्रैर्नक्षत्रैर्नेयात् अथराभिभ्रिभागेपुक्रमशो मृदूग्रचरभैर्नेयात् रात्रे प्रथमेभागेमृदुभिः द्वितीयेभागेउग्रैः तृतीयेभागेचरभैर्नेयात् अथविशेषमाह श्रुतीतिश्रुत्यर्केज्यमृगेषु अयनियमोन श्रुति

मिश्रास्यैर्ध्रुवभैर्दिनादिमलवेतीक्ष्णैर्द्वितीयेतिमेक्षिप्रैर्नैक्रमशोमृदूग्रचरभैरात्रित्रिभागेष्वियात् ॥ श्रु
त्यर्केज्यमृगेष्वयननियमोवैश्वात्यपादश्रवस्तिष्यशस्त्वभिजिद्वमेसफलदोयार्मीविनापिक्षण ॥ ४ ॥
एकार्केद्वयनानुकूलमनिशंभेदेदिवारात्रयोर्मैमिप्राक्शनिघद्रयोर्गतमपाक्पश्चाज्जगुर्वोर्हितम् ॥

श्रवणः अर्कोऽस्तः ईज्य पुष्य मृगः प्रसिद्धः एभिर्नक्षत्रैः सर्वभागेपुर्गतम्यमितिभावः अथाभिजिद्विशेषणंतत्फलंचाह वैश्वेति वैश्वमुत्तराषाढातस्यां त्यपादमतुपचरणः श्रवणस्यत्यस्तिष्यशः प्रथमः पचदशांशः एतत्प्रमाणोअभिजित्स्यात् सोभिजिद्यार्मीदक्षिणांदिशाविनासर्वदिक्षुफलदः क्षणो मुहूर्तोपि अभिजिद्यार्मीविनाफलदः यात्रणामभीष्टफलदोभवतीत्यर्थः ॥ ४ ॥ अथान्यदाह एकार्केद्वयनानुकूलमिति अर्कश्चद्वुश्चतयोरयनंअ र्केद्वयनंएकंचतत्अर्केद्वयनंचतत्तया तस्यानुकूलंगतंगमनअनिशंअहर्निशंहितंस्यात् भेदेसतिदिवारात्रयो क्रमेणशस्तस्यात् अयमर्थःसूर्योदिन

स्वामी चंद्रोरात्रिस्वामी हौचेदुत्तरायणेस्यातातदाहानशमुदग्गमनशस्त [illegible]
शंप्रतिगमनशस्तंस्यात् अर्थात् अन्यथानशस्तस्यात् अत्रप्राचीउत्तरसंबंधिनीज्ञेया तस्माद्यदाउदग्गमनंशस्तंतदाप्राग्गमनमपिशस्तभवति प्रती
चीदक्षिणसंबधिनीज्ञेया तेनयदादक्षिणदिग्गमनंशस्तंतदाप्रतीचीगमनमपिशस्तंस्यात् तथाचरत्नकोशे ॥ दिनकरकरप्रतप्तामकरादावुत्तराचपू
र्वीच ॥ यायाश्चकर्कटादौयाम्याशास्यप्रतीचींच ॥ अथान्यदाह भौमेइति भौमेप्राक्पूर्वदिशिगतंगमनंहितस्यात् शनिचंद्रयोरपाक्दक्षिणस्या

भृग्वर्कान्ह्युदगर्कभाद्युभमगैस्तष्टंहिसप्ताडलरूयंगाभ्यांविडलोनयोर्नगमनंश्रीदेवलोक्त्याहितम् ॥ ५ ॥
आज्यंदुग्धगुडौतिलान्दधियवान्माषानिनात्राश्यनोशूलेयानमनिष्टमिंद्रककुभोथाज्यंतिलान्नांतिमान् ॥

भृगुर्वोःबुधगुर्वोःपश्चात्पश्चिमाया भृग्वर्कान्हिशुक्ररविदिनेउदगुत्तरस्यांगतहितंस्यात् अथाडलंविडलंचाह अर्कभादिति सूर्यनक्षत्रात्युभ
दिननक्षत्रं अगैःसप्तभिस्तष्टशेषितसत् हिसप्त हौवासप्तवायदाभवतितदाडलःस्यात् व्यंगाभ्यात्रिषट्संख्यकाभ्याविडलःस्यात् अनयोरड
लविडलयोर्गमनश्रीदेवलोक्त्यादेवर्षिवचनेनाहितंस्यात् ॥ ५ ॥ अथवारशूलदोहदमाह सुगमम् इनात्सूर्यवारात्सकाशात् आज्यादीनिप्राश्य
प्राशायित्वाशूलेवारशूलेयानप्रयाणंअनर्थकृन्नोभवति अथदिग्दोहदमाह आज्यमिति घृतादिकंप्राश्यऐंद्र्यादिषुपूर्वादिषुहस्त्यादिभिर्यानसु

यानमवति स्त्रीप्रसिद्ध अनःशकटः हयोऽश्व नर शिविकावाहक एतदुक्तमवति दुर्गप्राप्यहस्तिनाप्राग्गमनासिद्धिः तिलानेतिलोदनप्राप्यरथेनदक्षिणगमनात्सिद्धिः मत्स्याम्प्राप्यअश्वेनपश्चिमगमनात्सिद्धिः दुर्गंप्राप्यनरैरुदग्गमनात्सिद्धिः स्यादित्यर्थ असतिसंभवेअभक्षेच्च निर्णयमाह तयोर्मक्षवाहनयोर्ध्यानाद्यापानंसुयानंभवति अपलग्नशुद्धिंसहेतुकामाह ब्रुवेऽपहारजमिति अयहरिजलग्नंब्रुवेवच्मि कथंभूतं ति

दुर्गप्राप्यचहस्त्यनोहयनरैर्यानसुयानतयोर्ध्यानाद्यामवतिब्रूवेथहरिर्जंतिप्यादिलक्षाधिकम् ॥ ६॥
स्वर्क्षानर्द्धिघटास्तभान्नजुगृह्यान्पष्ठंरिपोर्भादन्तस्वर्क्षांगेशरिपुंस्खलंजनिबलस्यक्तंतथासांप्रतम् ॥
यात्रालग्नगतत्यजेदथदिशामीशोर्कशुक्रोकुजोराहुमदशशांकसौम्यगुरवःकेंद्रेदिगीशेव्रजेत् ॥ ७ ॥

प्यादिलक्षाधिकंतिप्यादिम्पोलक्षाधिकबलिष्ठमित्यर्थ ॥ ६ ॥ स्वर्क्षेस्वर्क्षानर्द्धिघटादिकंपात्रालग्नगतस्त्यजेत् स्वर्क्षस्वराशि- अनर्द्धि स्वराशे अनुपचयभवन घट कुंभः अस्तमंअस्तगतग्रहस्वराशिः अनुजुगृह्यंवक्रग्रहस्वराशि एतान् रिपोर्भात्वैरिराशेःषष्ठ अनृक्षोदयं तथाचबृहज्जातके ॥ गोजाश्विकर्किमिथुना सम्मृगानिशाख्या षष्ठोदयाविमिथुनाःकथितास्तहति ॥ रूपमेषधनकर्कमकरा षष्ठोदयाः स्वर्क्षांगेशरिपुं अस्तंचअंगंचस्वर्क्षांगेतयोरीशाःस्वामीतस्यरिपुःतं खल-प्रसिद्ध निजबलस्यक्तंजन्मनिबलहीनंभवं तथासांप्रतंप्रस्तुतंबलस्यक्तंइत्युक्तंसर्वंपात्रालग्नगतं

त्यजेत् अथदिक्पतीनाह दिशामिति दिशांपूर्वादीनाईशाःस्वामिनःअर्कशुक्रादयःपाठक्रमात्स्युः केंद्रेदिगीशे १, ४, ७, १० सतिव्रजेद्रच्छेत्
यस्मिन्केंद्रेलालाटगत्वभवति तत्केंद्रवर्जयित्या अन्यकेंद्रेदिगीशेसतिव्रजेत् इदमग्रिमश्लोकेवक्ष्यति ॥ ७ ॥ अथदिक्पतौलालाटगत्वतद्दिग्ग
मननिषेधलालाटक्षणचाह दिक्पेलालाटगेसतिनप्रवसेत् प्रवासंनकुर्यात् तनौलग्नेवर्तमानइनःसूर्यःप्राक्प्राच्यांदिशिभालगःललाटस्थितः

दिक्पेनप्रवसेल्लुलाटगइनःप्राच्यंतनौभालगःस्यात्पश्चान्मदनेर्कजोंबुगबुधःसौम्यांस्वगोपाक्रुजः ॥ ऐ
श्यांद्वित्रिगतोगुरुर्ज्वलनदिश्यायव्ययस्थोभृगुर्वायौषट्सुतगोविधुर्निर्ऋतिदिश्यष्टांकसंस्थंतमः ॥ ८ ॥
वक्रीकेंद्रगतस्तदीयदिवसोलग्नेऽस्यवर्गोभवेद्यातुर्नाशकरःशुभोपितनुगोजन्मर्क्षलग्नेद्विपुः ॥ द्वीशा

स्यात् मदनेसप्तमेवर्तमानोर्कजःशनिःपश्चिमस्यांललाटस्थितःस्यात् अंबुगबुधःचतुर्थगतोबुधः सौम्यामुत्तरस्यांललाटस्थितःस्यात् खंदशमं
तद्गतःकुजोभौमःअपाक्दक्षिणस्याललाटस्थितःस्यात् द्वित्रिगतोगुरुःऐश्याईशान्याललाटस्थितःस्यात् आयव्ययस्थःभृगुःकविःज्वलनदिशी
आग्नेय्यांललाटगःस्यात् षट्सुतगोविधुश्चंद्रःवायौवायव्यांललाटस्थितःस्यात् अष्टाकसस्थंतमः अष्टमनवमस्थानस्थोराहुःनिर्ऋतिदि
शिललाटसस्थ.स्यादिति ॥ ८ ॥ वक्रीति वक्रीग्रहःकेंद्रगतःसन् यातुर्गमनकर्तुर्नाशकरःस्यात् तदीयदिवसोपिवक्रग्रहस्यदिवसोपियातुर्नाश

कर स्यात् ल कर स्यात् जन्मलग्नेद्विपुःशुभोपितनुगोपावुर्नाशकरःस्यात् जन्मराशिजन्मलग्नेतयोरीशीतयो रिपुः अधस्थ
र्यादीनांजन्मनक्षत्रमाह ईशेति स्पे अर्कंतःग्रहाणांईशादीनिजजन्मर्क्षांजिजन्मनक्षत्राणिस्यु ईशंविशास्वार्सूर्यस्य अग्निः कृत्तिकार्यद्वस्य
भंवुपूर्वाषाढाभीमस्य अजःश्रवणोबुधस्य भाग्यभंपूर्वाफाल्गुनीगुरो गुरुःपुष्यःशुक्रस्य पौष्णंरेवतीशनेःमाग्र्यंभरणीराहो सार्पमाश्लेषाके

भ्यब्वजभाग्यभानिगुरुभपौष्णातकेसार्पभंजन्मर्क्षाणिरवेरुदङ्मवगत खेटस्तनौहानिकृत् ॥ ९ ॥
वेशि सौम्ययुतस्तनोजनुपयेसद्विर्युताराशयोजन्माब्जोपचयस्थिताअपितनो स्वर्क्षोद्यमित्रर्क्षगा ॥
पापाअप्यतिशोभनास्तनुगताजन्मेश्वरौकेंद्रगौस्वाराख्यन्हितनौशुभोनफलदोमित्रान्हिपापोर्थद ॥ १० ॥

तोः उपग्रहगइति उपग्रहगतोनाम यदीयमग्रस्यभंजन्मनक्षत्रंतत्तिथिविषोत्पातहतस्यात् असौग्रहोलग्नेस्थितोहानिकृत्स्यात् ॥९॥
वेशिरिति सूर्याद्यूतपोराशिर्वेशिःससौम्ययुतःसन्अंगगोलग्नगोऽतिशोभनःस्यात् जनुषिजन्मकालेसद्विर्ग्रहैर्युतापेराशयःतनुगताः अतिशोभ
नाःस्यु जन्माब्जोपचयस्थिता जन्माब्जोजन्मचन्द्रः तस्मादुपचयानित्रिषडेकादशस्थानेतेपुस्थिताग्रहास्तेतनुगताअतिशोभनाः तनोरपि
जन्मलग्नादप्युपचयस्थलगतास्तेअतिशोभनाःस्यु स्वर्क्षोद्यमित्रर्क्षगाः जन्मनियेस्वर्क्षगाःउच्चगाःमित्रर्क्षगास्तेपापाअपितनुगताअपिशोभना

स्युः जन्मेश्वरोजन्मराशिजन्मलग्नस्वामिनोकेंद्रगोअतिशोभनोस्याताम् स्वारात्यन्हिस्ववैरिवारेशुभःशुभग्रहःतनोलग्नेवर्तमानोनफलदोभव
ति मित्रान्हिपापःतनौवर्तमानोऽर्धदःस्यात् तथाचयवनः ॥ रक्षकावर्द्धकाश्चैवयेस्युर्जन्मनिनायकाः ॥ तान्पापानपिनिःशंकोयात्रालग्ने
नियोजयेदित्यादि ॥ १० ॥ अथयात्रालग्नेइष्टाननिष्टाश्चश्लोकेनैकेनाह व्ययायार्थन्यगताःखलाःखइनजोन्नोंत्याद्यषष्ठाष्टगोभूयःसोपचितोस्तखांबुसुतगःशुक्रोस्तईज्यो
मृतौ॥नष्टज्ञोऽयगोग्रहान्वितशशीयातुर्महाविघ्नदाअन्यस्थानगताजयार्थसुखदास्त्याज्यंपुरो
क्तंनचेत्॥११॥स्वग्रामैकपुरात्मसद्मसुचतुर्वक्रेचतुःशालकेतूद्वाहेषुवधूप्रवेशनृपभीदुर्भिक्षपीडासुच ॥
३,८,९,१०,१२तत्रगताःखलाःपापग्रहाःखेदशमेइनजःशनिः व्ययायार्थन्यगताःखलाइत्यनेनैवसिद्धेपिविशेषदुष्टफलज्ञापनार्थंखइनजइत्युक्तम्
अंत्या१२द्य१षष्ठाः६ष्ट८गोजश्चंद्रः भूयःपुनःसचंद्रःअपचितःक्षीणचंद्रःकृष्णपक्षचंद्रः अस्त७खा१०वु२सुव५गःअस्त७शुक्रःईज्योगुरुर्मृतौ ८
नष्टज्ञोस्तामितबुधोव्यय१२गतः ग्रहान्वितःशशीयेनकेनाग्रहेणग्रहाग्यापिग्रहैर्वायुक्तश्चंद्रमाः एतेप्रत्येकंयातुर्महाविघदाःस्युः नानाप्रकारेणमर
णभंगादीन्ददतीत्यर्थः अन्यस्थानगताःउक्तेभ्योऽन्यस्थानगताःसंतस्तदाजयार्थसुखदाः तदाकदा चेद्यदिपुरोक्तंत्याज्यंनस्यात् ॥ ११ ॥

पवादमाह स्वग्रामेति स्वग्रामः प्रसिद्धः पृथक्पुरंप्रसिद्धम् आत्मसदनआत्मगृहं चतुर्मुखेचतुर्वक्त्रे चतुःशालकंप्रसिद्ध उद्वाहा वि वाहाःआद्यादयःविवाहाः तेषुपूजाप्रवेशाः नृपमीराजमयं दुर्भिक्षपीडा प्रसिद्धा तासु तीर्थस्वामिनिदेशयोःतीर्थतीर्थंगमनं स्वामिनिदेशः स्वाम्या ज्ञा तयोः भृगुवसिष्ठाभ्यांगिरः काश्यपेभृग्वाद्विगोवसमूहे भारद्वाजजवात्स्यपोर्गोत्रयोः एपूक्तेपुसितशुक्लोन्मुखं शुक्लमुखसमुखंयानगमनहित स्यात् अथवपूजवशेप्रतिशुक्रदोषोनोक्तः तत्तुभर्त्रासहगमनविषयम् मर्त्राविनागमनेदोषोऽप्यते नवोढायास्तुवंध्यात्वमिति तथाचभीपराक्रमे

तीर्थस्वामिनि देशयोर्भृगुवसिष्ठाज्यगिर काश्यपेभारद्वाजजवात्स्ययोर्हितकरयानसितशुक्लोन्मुखं
॥१२॥चंद्रेपूजभमेपगेसतिसितोंधःस्यात्तदासमुखयानंसत्परपूर्वयो सितविपर्यासात्सदावश्यके ॥

। स्वामिनानीपमानायांप्रतिशुक्रोनविद्यतइति ॥ तथाचमतांतरे ॥ नवोढायास्तुवंध्यात्वपदुक्तसमुखेभृगो ॥ तदभावेवुधेर्जेपकेवलंतुहिरागमइति। तथाचलल्ल ॥ स्वभवनपुरप्रवेशोदेशानांविग्रहेतथे हाहो॥नववध्यागृहगमने सितशुक्रविचारणानास्तीति॥तथाचमत्स्यपुराणे ॥ चतुःशालचतुर्द्वारम लिंदे सर्वतोयुतम् ॥तान्नतत्सर्वतोभद्रंनतत्रप्रतिशुक्रतति॥तथाचवासिष्ठः॥ काश्यपेपुवसिष्ठेपुभृग्वङ्गिरसेषुच ॥ भारद्वाजेवुवात्स्येपुप्रतिशुक्रोनावि चतइति ॥ ११ ॥ मयाप्यंचापवादम॥ह चंद्रेइति चंद्रेपूजभमेपगेसतिसितःशुक्रःअधःस्याद् तदासमुखंयानंसत् शुभस्याद् तथाचगर्गः ॥ पो

ष्णादिवन्हिभाग्यंद्यौयावत्तिष्ठतिचंद्रमाः ॥ तावदंधोभवेच्छुक्रःप्रवेशेनिर्गमेशुभइति ॥ अथआवश्यकेप्रवृत्तिमाह परपूर्वयोरिति परपूर्वयोः पश्चिम
पूर्वयोः सितविपर्यासात्शुक्रविपर्यासात् आवश्यकेकृत्येसति यानंसत्स्यात् एतदुक्तभवति शुक्रेपूर्वकपालेगतेसतिपश्चिमांगच्छेत् पश्चिमक
पालंगतेसतिपूर्वांगच्छेत् तथाचज्योतिःप्रकाशे॥अत्युत्सुकेषुयावत्प्राक्कपालस्थोभृगुर्भवेत्॥तावत्पाशिादेशगच्छेत्प्राचींप्रत्यक्स्थितस्तथेति॥अथ
प्रयाणविधिमाह राजेति राजात्रिदिवसैरेकाब्धिषट्क्रोशकान्व्रजेत् एतदुक्तंभवति प्रथमदिनेक्रोशंगच्छेत् द्वितीयदिनेचतुःक्रोशान् तृतीयेषट्

राजातर्पितवन्हिभूसुरसुलब्धस्नेहानुवृत्तिंत्यजन्तृप्तःकार्यमनाव्रजेत्त्रिदिवसैरेकाब्धिषट्क्रोशकान् ॥१३॥

क्रोशान् अर्थात्परतोयथेच्छगच्छेत कथंभूतःराजा तर्पितवन्हिभूसुरसुलब्ध वन्हिरग्निः भूसुराःब्राह्मणाः सुलब्धोवांछवाः तेतर्पिताः वन्हिभूसुर
सुलब्धोयेनसतथा अत्रायंभावः समित्चरुतिलादिनावन्हितर्पयित्वा दक्षिणानादिभिर्भूसुरास्तर्पयित्वा वस्त्रालंकरणादिभिःसुलब्धःकलत्रादीं
स्तर्पयित्वा व्रजेदिति किंकुर्वन् स्नेहानुवृत्तिंत्यजन्सन् स्नेहेनअनुवृत्तिः पुनर्गृहागमनं अयंभावः यात्रार्थंबहिर्गत्वापुत्रादिस्नेहवशात्तद्बलो
कनार्थंगृहंनागच्छेदिति कथंभूतःराजा तृपः बुभुक्षितोनगच्छेदितिभावः पुनःकिंलक्षणः कार्यमनाः कार्यायउत्कठितांतःकरणः तथाचरत्नाव
ल्या। स्वनिकेतात्सुरभवनात्प्रधानादाश्रमाद्गुरुगृहाद्वापि ॥ यायात्कृताग्निकार्यःप्राग्यद्विघ्यंहिजानुमतमिति ॥ तथाचबृहस्पतिः॥देवज्ञंपूजयित्वा

तावदुपःपुण्यशक्तित ॥ प्रदक्षिणमिमान्कृत्वातिष्ठुंप्पायेवुमापतिमिति ॥ तथाचज्योतिःप्रकाशे ॥ संवोप्यस्वांगनांविप्रान्जलात्प्रतिरत्यादिकम् शुचि.शुक्लांबरोप्यीपोनत्वेष्टुमुमनाव्रजेदिति ॥ तथाचकश्यपः ॥ पात्रासमेपदद्यानुपरागग्रहस्यनैपम्पे॥गोभूहिरण्यवस्त्रैःसंपूज्यश्रद्धयाचदैवनमिति ॥ बृहपात्रायां ॥ स्नातोमुक्तोनुलिप्तश्चसर्वालंकारभूषितः॥शुक्लांबरधरःश्रीमान्भगःसुखमेवतइति॥ भूपालषष्ठमे ॥ ब्राह्मणाचावमन्येतकोपपेषनिजांगनाम् ॥ पात्रांलब्धाग्रहंनैवसिद्धिकामोविशेद्गृहमिति ॥उक्त ॥ पात्रायांप्रस्थितोपथब्राह्मणानवमन्यते ॥ तद्वंतजीवितंतस्यनासौप्रतिनिवर्त

क्रोधक्षौररतिश्रमामिषगुडघृताश्रुदुग्धासवक्षाराभ्यगभयासितांबरवमीस्तैलंकटूष्णेन्नमे ॥

तइति ॥ बृहपात्रायाम् ॥ पत्नुसंप्रस्थितोपात्रांस्वभार्यांनाभिनंदति ॥ भार्यावानाभिनंदेतनास्यप्रतिनिवर्तनमिति तथाचरत्नावल्याम् ॥ क्रोशंवापादिवाप्यर्धप्रथमेहनिशास्यते ॥ द्वितीयपोजनंगत्वानिवसेत्तमहीपतिः ॥ तृतीयेपोजनसार्द्धंवसेदाक्रम्यदूरतः ॥ ततःपरंपयेष्टुंपायाम्भागैमहीश्वरइति ॥१३॥ अपपादकस्यनिषेधमानाह क्रोध प्रसिद्धः क्षौरप्रसिद्धं रतिर्मैथुनं श्रमःक्लेशः आमिषंमांसं गुडःप्रसिद्धः घृतंघृतवरण अश्रु अश्रुमोचनं दुग्धंप्रसिद्धम् आसवोमद्यं क्षारंक्षारद्रव्यंमाषादि अभ्यगःतैलाभ्यंगः मषश्चकारिपुमषमिश्रयेपः असितांबराणि अशुभ्रवस्त्राणि रक्तरूप्यादीनि वमिर्वमनं तैलंप्रसिद्धं कटुमरीचादि इत्येतद्गमेगमनेउत्सृजेत् त्यजेत् अथउक्तेपुर्किंकिंकतिदिनत्यजेदित्याह क्षीरेति क्षीरक्षौर

रतीःक्रमात् त्रि ३ शर ५ सप्ताहं त्यजेत् क्षीरंदुग्धंन्यहं ३ क्षौरंशराहंपंचाहं ५ रतिंसप्ताहंत्यजेदित्यर्थः परंउर्वारितंतद्दिनेप्रयाणदिनेत्यजेत् रोगंव्या धिंयावद्बाधंत्यजेत् रुग्यार्तवंवीजदानपर्यंतंत्यजेत् सितान्यतिलकं श्वेतव्यतिरिक्तंतिलक पीतकौंकुमादिकंतद्दिनेत्यजेत् प्रस्थानकेपिइत्येतत् त्यजेत् प्रस्थानकंनाममुहूर्तसमयेकिंचिदभीष्टवस्तुचालनं तदुक्तंरत्नमालायां ॥ छत्रायुधाद्यंमनसस्वभीष्टंप्रचालयेद्वैजयिकंजयार्थीति ॥ एतच्चु कार्यवशात्क्रियते प्रस्थानेसंपूर्णफलंनास्ति तथाचरत्नकोशे ॥ कार्यवशात्स्वयमगमेभूभर्तुःकेचिदाचार्याः ॥ छत्रायुधाद्यभीष्टंवैजयिकंनिर्गमेकुर्यु

क्षीरक्षौरतीःक्रमात्त्रिशरसप्ताहंपरंतद्दिनेरोगंरुग्यार्तवंसितान्यतिलकंप्रस्थानकेपीतिच ॥ १४ ॥

रिति ॥तथाचगर्गः स्वशरीरेणयःकश्चिन्निर्गच्छेच्छुद्धपान्वितः ॥ तस्ययात्राफलंसर्वंसपूर्णंपाथिसिद्ध्यतीति ॥ तत्पालनत्वधिर्ग्रंथांतरात्॥गृहाद्गृहांत रंगर्गआहसीमातरंभृगुः॥शरक्षेपाद्गृहाज्जोवासिष्ठोनगराद्बहिरिति ॥ एवंप्रस्थानेकृतेपिस्वयमन्यस्मिन्सुदिनेगच्छेत् तथाचज्योतिःप्रकाशे॥प्रस्थाने पिकृतेनेयात्महादोषान्वितेदिने॥गर्भयोगंविनाकालशुद्ध्यादीचाप्युतेतथेति ॥रत्नमालाय ॥ वसेन्नचैकत्रदशाक्षितीशोदिनानिनोसप्तचमांडलीकः॥ यःप्राकृतःसोपिचपचरात्रभद्रेणयात्रापरतःप्रयोज्येति ॥ एवविधेप्रस्थानेपिक्रोधक्षौरत्त्यादीन्वर्जयेदित्यर्थः गर्गः ॥ क्रोधक्षौरंतथावांतितैलाभ्यं गाश्रुमोक्षणम् ॥ धूतमांसंगुरुतैलंयानंमद्यंपरित्यजेदिति रत्नकोशे॥कालीयकंहिंगुलकःकुंकुमंरक्तचंदनं॥पीतंरक्तंचवसनंयातुर्नेष्टानितत्क्षणादिति

वहपाषाणम् ॥ कटुतैलगुडतीक्ष्णकर्मांसाशनतथा ॥ मुक्तकापोपातिमोहेनव्याधितःसनिवर्ततइति ॥८॥ ॥ प्रमत्तोव्यापिसोमीनःशीतःकुन्दोयुमृतितः ॥ अभ्यानंनप्रपद्येतस्त्रीवक्षेपस्तथैवच॥ आवरूपां ॥ स्वकीयांपरकीयांवास्त्रियंपुरुषमेववा॥ताडयित्वानुपोगच्छेत्तन्नसतस्यजीवितमिति ॥ भृगुः ॥ त्रिरात्रवर्जयेत्तीरंपंचरात्रंसुरक्तमद्यमांसादशोपाणिसनाहमेपुनस्त्यजेदिति ॥ पात्रायागमनलक्षणंगर्गोक्तंक्षेपम् ॥ मुहूर्त्तममयेप्राप्तेहंसचारां मिणाव्रजेत् ॥ देवज्ञामात्यविप्राप्तपुरोगैःस्वजनेरत ॥ पूर्वद्वारेणमुद्गरूपपादपाभांनराधिपः ॥ द्वात्रिंशतंपदंगत्वापानमारुह्यसत्वजेत् ॥ततोनिरीक्षयेत्

वस्त्रालंकरणानिपूर्णकलशास्तौर्यध्वनि पुत्रवान्शाखादर्शनृपाश्वदतिसुरभिस्त्रीपुष्पधान्यादिच ॥
दोलादीपविधूमवह्निसुरभिद्रव्याणिशुभ्रोदपोवेश्याछत्रवितानचामरकुमार्योमीनगोरोचने ॥ १५ ॥

तत्पक्षशकुनां॰ शुभाशुभान् ॥तथैवसदसच्चस्वप्नान्निमित्तानिचसप्रजेदिति ॥१४॥ इदानींशकुनानाह वस्त्रेतिवस्त्राणिश्वेतवस्त्राणि अलंकरणानि पक्षशकुनमध्येपठितानि अलंकरणानि सुवर्णादिनिर्मितानि भूषणानीत्यर्थः पूर्णकलशाः प्रसिद्धाः तौर्यध्वनिः वाद्यध्वनिः पुत्रवान्मद्धमानःपुत्रवान् शाखः प्र० आदर्शोमुकुरः नृपोराजा अश्वःप्रसिद्धः दंताहस्ती सुरभिर्गौः स्त्रीसौभाग्यवती पुष्पाणिश्वेतानि धान्यातिअक्षण्यानि क्षण्यानि शकुनमध्येपठितानि आदिशब्देनमुक्तादिग्रहणं दोलाप्र दीपःप्र० विधूमवह्निः धूमरहितोग्निः सुरभिद्रव्याणि सुगंधद्रव्याणि कर्पूरचंदना

दीनि शुभोदृषः श्वेतवृषभः वैद्यप्रा० छत्रप्र० वितानंवस्त्रनिर्मितंप्र० चामरंप्र० कुमारीप्र० मीनोमत्स्यः जलादुद्धृतः गोरोचनंप्रसिद्धम् ॥ १५॥
अथसंकोचेनाह यद्यदिति यद्यद्स्तुस्वातनितातत्तोषकरणंस्वातंअंतःकरणतस्यनितातंअतिशयेनतोषकरणसतोषजनकतत्तत् किंबहुनोक्तेन
एवंसकोचेनोक्तेदानींयेषुसंतोषासतोषाभावःतानिपूर्वाचार्यैःशकुनमध्येपठितानितान्याह कोरुद्धृतंगोमयम् कोःपृथिव्याउद्धृतंगोमयम् मृच्च
थिव्याःउद्धृतामृत्तिका अंभोर्थघटान्वित.सहचरः उदकार्थंकुभयुक्तोजनःसन्सहचरः सहचरतीतिसहचरः "जलार्थीरिक्तकुंभस्तुपथिकेनसह

यद्यत्स्वांतनितांततोषकरणंकोरुद्धृतंगोमयंमृच्चांभोर्थघटान्वितःसहचरोधौतांबरोमौत्रकः ॥
दूर्वादर्भरथाःपलास्त्रमदिरावर्णीगुरुर्दैवविद्विप्रौमित्रमृगावरोदनशवंसिद्धार्थदुग्धादिच ॥१६॥

व्रजेत् ॥ निवर्ततेयथापूर्णःकृतार्थःपथिकस्तथेत्युक्तत्वात्"धौतावरोमौत्रकः धूतवस्त्ररजक. दूर्वाप्रसिद्धा दर्भःप्रसिद्धः दूर्वादर्भौतृणे अपिशुभे
अपशकुनमध्येयत्तृणपाठिनतदेतद्दर्भातिरिक्त रथःप्र० पलंमासम् असृग्रक्तं मदिरा मद्यम् वर्णीब्रह्मचारी गुरुःप्रसिद्धः दैवाविज्ज्योतिषी विप्रोद्वौ
ब्राह्मणौ मित्रंइष्टः मृग.प्र० अरोदनशवरोदनरहितप्रेतम् सिद्धार्थागौरसर्षपाः दुग्धादिदुग्धदध्याज्यं ननुयद्यत्स्वातनितांततोषकरणमित्यनेनदुग्
ग्धग्रहणत्वात्सिद्धम् पुनःकिमुक्तदुग्धमिति सत्यम् दुग्धंभक्षणेनिषेधिततत्संदेहंनिवृत्त्यर्थंदुग्धपठनामित्यदोषः एवमेवात्रविचारणीयम् तथाच

वसंतः ॥ दध्याज्यदूर्वांततपूर्णकुंभासिद्धार्थकचंदनानि ॥ आदर्शांत्वामिषमीनमक्षगोरोचनागोपमसुद्भृतकोरिति ॥ भारद्वाजःराजाधिप्रोसु
तद्देश्यपासपुत्रास्त्रीकुमारिका॥अभिरूपोनरोस्त्रीवागजोवाजीवृषःसिताःतरुण्याधृताम्यवर्णैर्गोःसवत्साचविशेषतः ॥उद्धृतगोमयंनीतंमृत्तिकाघोद्धृ
तातया ॥ रजकोधौतवस्त्रभवेश्यातोर्यत्रिकुष्कानिः ॥ जपमंगलशब्दश्चेतिपाठःसदीपकः ॥ दीपोवाप्रज्वलद्वह्निः पूर्णकुंभोनृपासनम् ॥ म
यूरमांसघरुधिरंमत्स्यानिविविधानिच ॥ इतरोमपुतांचूलेवस्त्रालंकरणानिच ॥ रौप्यताम्रमणिस्वर्णद्रव्यंदर्पणमसताः ॥ वितानंचामरंछत्रंदृषा

कुर्वन्दक्षिणत सदेतदितरद्वामेत्रकुर्वन्व्रजेत्रस्मास्थीधनाविट्तुपश्मलवणोपानत्तृणायस्करा ॥
पिण्याकौपधरुष्णधान्यरुदनतक्रंसधूमानल कार्पासारुणपुष्पचर्मचगुडस्तैलायसीकर्दम ॥ १७ ॥

र्मतृणप्वजाः ॥ दोलाचारुरयोद्वहःपुत्रपौत्रार्थपुत्रशुचिः ॥ चंदनानिमृगांधीनितथापुष्पाणिरोचना ॥ घृतंदधिपयःपेयासिद्धमन्नंवधः शुभम् ॥
देवताःसगुरुर्लेखमित्तोत्साहकराणिच ॥ दृष्टेतानिनरोपापात्सर्वार्थलभतेनुसहवि ॥ १६ ॥ अथाशुमान्याह कुर्वन्निति एतत् अनंतरोक्तंसदशु
भं दक्षिणत दक्षिणमागेकुर्वन् सन् इतरत् अशुभवस्तुपमाणंवामेकुर्वन्सन्व्रजेत्गच्छत् अस्मेति अस्मप्र॰ अस्थिप्र इधनंम॰ विट्विष्ठा तुषंधा
न्यादीनांत्वक्फल्गु अश्मापाषाणः लवणंसामुद्रिकं उपानद्दौप्रसिद्धो तृणप्र॰ अयस्करोलोहकारः स्वर्णकारइत्यर्थः पिण्याकमर्दितातिलाः ओ

पथंप्र०कृष्णधान्यंमाषादि रुदनंरोदनादि तक्रंप्र०सधूमानलः धूमसहितोऽग्निः कार्पासःप्र०अरुणपुष्पंजपादि चर्मप्र०गुडःप्र० तैलप्र०अयोलोह कदर्मःपंकः ॥१७॥ मत्तइति मत्तःउन्मत्तः वातःवमितः बुभुक्षितःप्र०अतकःप्राणिहिंसकः खलोदुर्जनः मुंडीमुंडितः जटीजटिलःव्याधितोरोगी खजः पादेनखंजः व्यंगोंऽगहीनः दिगंबरोनग्नः यतिःसंन्यासी अरिर्वैरी काषायीगैरिकरंजितवस्त्रःमुक्तालकोमुक्तकेशः चौर.प्र० अभ्यक्तः

मत्तोवांतवुभुक्षितांतकखलामुंडीजटीव्याधितःखंजव्यंगदिगंबरायतिरिरिःकाषायिमुक्तालकौ ॥ चौराभ्यक्त मलाविलाश्चपतितःपाश्यर्गलीगुर्विणीवंध्याकृष्णवृषाहिभेकसरठागोधावराहःशशः ॥१८॥ जाहौतूमहिषः खरोष्ट्रमहिषारूढाश्चरिक्तोघटश्छिक्काप्राणिशिरोंगकंपपदवीबंधाःकुवागाहवौ॥ पातोयानपलायनंश्वकलहः षंढंक्षुतंगोर्ज्वलद्वेश्मेतिप्रतिबंधकाःकुशकुनाश्छिक्कादिकामृत्युदाः ॥ १९ ॥ तैलाभ्यक्तः मलाविलोमलिनः पतितोजातिभ्रष्टः पाशीप्राणिबंधनार्थंपाशवान् अर्गलीअर्गलावान् गुर्विणीसगर्भा वंध्यानिरपत्या कृष्णवृषःकृष्णोनड्वान् अहिःसपः भेकोमंडूकः सरठप्र० गोधाप्र० वराहःप्र०शशःप्रसिद्धः ॥१८॥ जाहइति जाहःमडलीलोकेसेहलीतिप्रसिद्धा "जाहकोगात्रसंकोचीमंडलीचवुधैःस्मृतइतिहलायुधः" ओतुर्मार्जारः महिषःप्रसिद्धः खरोष्ट्रमहिषारूढाःप्रसिद्धाः रिक्तोघटःप्र० छिक्काक्षुत् प्राणिशिरोंगकंपःप्राणिनागोऽश्वादीनाप्राणिनाशि

रोमाटनम् अंगस्फाटनंवा पदवीबंधोमार्गबंधे ऊर्णनाभादिभिर्मार्गोबध्यते कुवाक्कुत्सितवाक्यश्रवणम् आहव संग्रामः विडालमहिषादीनाम् पातःपतनं वस्त्रादीनांस्खलनम् पानमश्वादितस्यपलायनम् श्वकलहःशुनांकलहः पैठनपुस्तकम् गोसुतंप्रसिद्धम् ज्वलद्वेश्मज्वलद्गृहदर्शनम् इत्येतेऽपशकुनाःप्रतिबंधका कार्यप्रतिबंधका स्युः छिक्कादिकाः अपशकुनास्युदा स्युः तथाक्तमागमांतरे ॥ तृणशैलादिकार्पासभस्मखमतुषोपधम् ॥ सामुद्रगुडपक्काहिमत्तंवांतंवुभुक्षितमित्यादि ॥ १९ ॥ अथशकुनांतरमाह भृगोधमरः अलिर्वृश्चिकः उष्ट्रः प्रसिद्धः पठच्छुका शब्दंकु

भृंगल्युष्ट्रपठच्छुकाश्वनखिन स्त्रीसज्ञकावामत कालीकुक्कुटपुत्रयाश्वसुरभिर्दक्षेमनोभीष्टदा ॥
भारद्वाजशिखंडिचापनकुलाहंसोजएतेदृशयाताइष्टफला स्युरासभरवोवामेपिपृष्ठेर्थदः ॥ २० ॥

वर्णाराजशुका नखिन श्वानादयः स्त्रीसंज्ञकाःचटकादयः एतेवामतःमनोभीष्टदाःस्युः कालीमहिषी कुक्कुटःप्र०पुंप्रयाः पुरुषसज्ञकाःकाकादयः सुरभिर्गौः एतेदक्षेमनोभीष्टदाःस्युः भारद्वाजः शिखंडीमयूरः चाप·प्र नकुलोवन्नुः हंसःप्र० अजोवस्तः एतेभारद्वाजादयः दृशंयाताःसंतः इष्टफलाःस्युः अपमथ भारद्वाजादयोवामेषादक्षणेवाग्रेवाऽष्टमाभाइष्टफलाः अभीष्टफलदाभवंतीत्यर्थः रासभरवोगर्दभध्वनिर्वामेपृष्ठेपिअथ दःअभीष्टार्थदोभवति ॥ २० ॥ अथपेपुपेपुकस्पेपुविपरीतशकुनाःशुभाश्रयानाह नपुत्तारइति नपुत्तारोनपुत्तरण्यं मर्यनुपावीनां प्रवेशोग्रामा

दिप्रवेशः समरःसंग्रामः द्यूतंप्र० नष्टेक्षणंनष्टवस्तुनःअवलोकनम् व्याधौरोगोपचारे एषुविलोमशकुनाविपरीतशकुनाः शुभदाःस्युः अयमर्थ
गमनेयेऽपशकुनास्तेनद्युत्तारादिषुशुभदाःस्युरित्यर्थः तथाइडायानाड्याभरेपूर्णतायाविलोमशकुनाः शुभदाःस्युः तथाचवसतः ॥ भवेदिडायाप
रिपूरितायांसर्मोपिवाम.शकुनःप्रशस्तः॥ स्यातिंपगलायांपरिपूरितायासर्वोपिसव्या.शकुनःप्रशस्तः॥ संगरणेकर्मणिचप्रवेशेशुक्लेग्रहेनष्टविलोकनेच॥
व्याधौसरिदुर्गवनादिकेषुशस्तः प्रयाणाद्विपरीतभावइति ॥अन्यच्च ॥ नद्युत्तारेभयेयुद्धप्रवेशेनष्टवीक्षणे ॥ शकुनाव्यस्तगा.शास्तानृपालोकेप्रयाणव

**नद्युत्तारभयप्रवेशसमरद्यूतेषुनष्टेक्षणेव्याधौस्युःशुभदाविलोमशकुनानाड्याइडायाभरे ॥ आद्येदुःशकुनेनि
वृत्यचशुचिर्भूत्वाष्टधास्वायमंकृत्वेयादपरेष्टिवारमपरेदत्वासुवर्णंव्रजेत् ॥ २१ ॥ इतियात्राप्रकरणम् ॥**

दिति॥अथप्रथमेअपशकुनेजातेसतिकिंकर्तव्यमाह आद्येइति आद्येप्रथमेदुःशकुनेजातेसतिनिवृत्यनिवर्तनंकृत्वातत्रशुचौदेशेउपविश्य शुचिःप्रक्षा
लितपाणिपादःअचातःकृताचमनः असवःप्राणास्तेषाआयमःप्राणायामः अष्टधा अष्टवारकृत्वा इयात्गच्छेत् चेद्यदिपुनःदुःशकुनःस्यात्तदानि
वृत्यशुचिराचातोऽष्टिवारषोडशवारअसून्नियम्येयात् अपरेतृतीयेदुःशकुनेजातेसतिसुवर्णंदत्वाइयात् एतदावश्यकगमनाविषयम् प्राणायामान
धिकारीतावत्कालंस्थित्वाव्रजेत् तथाचज्योतिर्निबधे॥ विरुद्धेशकुनेपूर्वंप्राणायामाष्टकंचरेत् । द्वितीयेद्विगुणान्कृत्वातृतीयेव्रजेत्कुचिदिति ॥ त

योरित्यर्थः तथाभ्यारान्हिविगतःआरोयस्मात्एषांवियंअहःतस्मिन् भौमरहितदिनइत्यर्थः पूर्वाण्हक अन्नदिनस्यह्नोभागो पूर्वभागःपूर्वाण्हः
तास्मिन्आचार्याःसुरस्थापनंप्रोचुः शेषस्पष्टम् सर्वामरस्थापनमितिशेषः लग्नवलंप्राग्वत् ॥ १ ॥ अथवस्त्रपरिधानंतस्यक्षालनंउंदुरादिभक्षित
फलच ह धार्यामित वसुर्धनिष्ठाः अदितिःपुनर्वसुः इनपंचकंहस्तपचकं गुरुमंपुष्यः अश्विअश्विनी अत्यंरेवती ध्रुवाणिपूर्वोक्तानि एतेर्नक्षत्रैः
ज्ञत्रये बुधगुरुशुक्रवारे अंबरवस्त्रभार्यं नान्यत्र यतउक्तं ॥ रवोजीर्णेविधौस्तोकजलार्द्रेंदुःखदंकुजे ॥ बुधेधनंगुरौज्ञानंशुक्रेसौख्यंशनौमलमिति ॥

धार्यंवस्त्रंदितीनपंचगुरुभाइव्यंत्यध्रुवैर्ज्ञत्रयेज्ञोनेक्षाल्यमिहाखुभक्षितमसन्मध्यत्रिभागेऽबरम् ॥

लग्नवलंप्राग्वत् अथक्षालनमाह इहास्मिन्वस्त्रधारणोनक्षत्रादौक्षाल्यप्रक्षालनीयं कथंभूते ज्ञोने बुधवाररहिते उक्तंच ॥ वस्त्रहेमाद्यलंकारधार
णोक्तैश्चभादिभिः ॥ तत्संहतिश्चनिर्माणंविदध्यात्क्षालनादिकामिति ॥ यद्यपि यस्यांगंयददोंगिनोगदितभेकुर्यादितिपूर्वमेवअंगभूतकर्मोक्तम् त
थापिक्षालनेबुधवर्जनार्थंज्ञोनेइहक्षाल्यमित्युक्तं बुधनिषेधश्चवणात् उक्तंच ॥ शनौसोमसुतेश्राद्धेषष्ठयामावास्ययोस्तथा ॥ वस्त्राणाक्षालनंचैवदह
त्यासप्तमंकुलामिति ॥ अथोंदुरादिभक्षितफलमाह आखुभक्षितमिति आखुःउंदुरःतेनअंबरंमध्यत्रिभागेभक्षितंअसत् दुष्टफलंस्यात् एतदुक्तंभव
तिनवांत्रिगुणंकृत्वायदिभक्षितभागोमध्यत्रिभागेपततितदादुष्टामित्यर्थः आखुरित्युपलक्षणम् तेनाग्निदग्धंगवादिभक्षितंमष्यादिलिप्तंज्ञेयम् त

पाषोक्तैरुक्तगते ॥ दग्धवारकुटितचगोमयमषीपंकैर्विलिप्ततदावष्टभूपकपूर्वकैरशुभदमप्यात्रिभागेऽशुभकामिति ॥ अथक्षिप्तारक्तवस्त्रधारणभूषणधारणमनुक्तमन्यराणांकुप्रकुपप्राशास्त्यवदुत्तरार्धेनाह स्त्रीति स्त्रीअष्टकेवस्त्रधारणमादोअंबरभूषणसुवर्णादिभूषण विभृयात् धारयेत् कर्थभूतम्या दित्यपुष्यध्रुवे विगतानिआदित्यपुष्यध्रुवाणियस्मात्तत्तथातस्मिन् यतोधात्रिप्तारक्तवस्त्रभूषणधारणेदोषोदृश्यते तयाचोक्तम् ॥ पुष्यादित्यध्रुवे विष्ण्ये स्वणरक्तांबरादिकम् ॥ नवनभूषणधार्यनार्पादापितुरापुपेहति ॥ लग्नबलप्राप्यवत् अथचंद्रादीनांप्राशास्त्यमाह श्वेतेवस्तुनिरोप्यमुक्ताफ

स्त्रीरक्तांबरभूषणेत्रविभृयाद्यादित्यपुष्यध्रुवेश्वेतेऽब्जोऽरुणरुक्मयो कुजरवीकृष्णेशनिःशस्यते ॥ २ ॥
वस्त्रोक्तैर्व्यनिलद्वयाश्विभिरगेंगेनुर्विभूषाहितावित्राज्ञोत्सवलग्धपूदितमनुक्तेपीष्टकृद्धारणम् ॥

लादिके अब्जचंद्रोहित सोमवारेश्वेतवस्तुधार्यमित्यर्थः कुजरविअरुणरुक्मयोःशस्येते शनिःकृष्णेवस्तुनि नीलवस्त्रादिकेशस्यते शनीत दापमितिभावः क्षत्रपेवुसर्वधार्यामितिपुरोक्तम् ॥ २ ॥ अथनराणांभूषणधारणदत्तरणेनाह वस्त्रोक्तैरिति वस्त्रोक्तैर्मांविभिर्वस्त्रादितीत्य क्तैः अगेंगेस्थिरलग्ने नुनरस्य अर्कलक्षतिरलकरणं हितस्यात् किंलक्षणैर्वस्त्रोक्तै व्यनिलद्वयाश्विभि अनिलद्वयंस्वातीयुगंस्वातीविशा खेति अश्विनीप्रासिद्धा विगतेअनिलद्वयाश्विभ्योयेभ्यस्तानितथातस्मिन् स्वातीविशाखाश्विनीरहितेरित्यर्थः लग्नबलप्राप्यवत् अथहितीय

चरणेनविशेषमाह विप्राज्ञेति मिप्राज्ञाश्राह्मणाज्ञा उत्सवोपिवाहादिकः लब्धिर्लाभः आसुसत्सु अनुक्तेपिमादौधारणम्वस्त्रादिधारणमिष्टक
त्स्यात् तथाचोक्तव्यासेन ॥ लब्धंराजप्रसादेनविप्रादेशात्करग्रहे ॥ प्रीत्यादत्तोत्सवेवस्त्रंधार्यंनिंद्योपिभादिकेइति ॥ अथोत्तरार्द्धेनपण्यानाक्रयविक्र
यावाह मैत्रेति मैत्रमनुराधा शेषसुगमं घटपरर्ध्यंगे घट.कुभःतस्मात्परमन्यतमं तच्चतद्ध्यगंचक्रद्धयंगंउपचयलग्नतस्मिन्कुभव्यरिक्तोपचयल

मैत्रार्कानिलमूलदस्रहरिभेद्वीज्याजपादोत्तरेपण्यानांक्रयविक्रयौघटपरर्ध्यंगेस्वशुद्धौतनु ॥ ३ ॥
प्रेतज्वालनशय्यकावितननेस्तंभोच्छ्रयंयाम्यदिग्यानंकाष्ठतृणोच्चयंपरिहरेत्कुंभद्वयस्थेविधौ ॥
सेवेष्टाध्रुववारुणांत्यवसुभैःखायेखौवाकुजेसंन्यासःस्थिरभेखलैर्गतबलैःषष्ठांत्यगेभार्गवे ॥ ४ ॥

मेषपण्यानापूगफलखर्जूरादीनाक्रयाविक्रयौ तनुविस्तारय कुर्वित्यर्थः कस्यासत्याम् स्वशुद्धौसत्यां स्वंधनभावःतस्यशुद्धिःपापराहित्यंतस्यां
सत्याम् शेषप्राग्वत् तथाचोक्तं ॥ दशमैकादशेलग्नेवित्तकेंद्रत्रिकोणगैः ॥ शुभै.पुण्यस्यकर्मोक्तवर्जयित्वाघटोदयमिति ॥ ३ ॥ अथयत्तार्द्धेनध
निष्ठापंचकेवर्ज्यमाह प्रेतेति कुंभद्वयस्थेविधौसति कुंभमीनगेचंद्रेसति परिहरेत् सर्वथानाचरेत् स्पष्टम् अथोत्तरार्द्धचरणेनसेवामाह सेवेति
ध्रुवादिभिर्नक्षत्रैःसेवाइष्टास्यात् सुगमत् कस्मिन्सति खायेखौसति वाइत्यथवाकुजेसति खंदशम आयंएकादशं अनयोरन्यतमे रवि

मोमयोरग्यतमेसतीत्यर्थः परिमेंद्रप्रेसेवाभिपतेतरमाद्धाराशमेपेकादशेवारवोम मेवासतिसेवादृष्टाहितकरास्यादित्यर्थं शेषंप्राग्वत् अथ चतुर्थवरगेनसन्यासमाह सम्पासइति स्थिरलग्नत्रेस्थिरलग्नेचसंन्यासइष्ट स्यात् के स्वटेर्गतबले पापग्रहेहीनबलेरित्यर्थः ससम्पर्धेतृतीयाकस्मिन्तति मार्गवे शुक्रेषष्ठसंस्थेऽ,१२सति शेषंलग्नबलंप्राग्वत् उक्तच ॥ स्थिरदेकादशेसौरिर्म्यपेपष्टेचमार्गव ॥ सबलेधर्मपेजीवेकेन्द्रेदीर्घायुरादिशेदिति ॥ ४ ॥ अथदशग्रहपेनरुपिकर्माह उद्गाहेति उद्गाहर्क्षाणिपूर्वोक्तानि मूलात्पार्केस्पदीनिएकादशसंख्याकानि चराणि प्रसिद्धा

उद्गाहर्क्षेवरद्विपेंद्रलघुभत्वाष्ट्रैःशुभास्यात्कविव्यार्किज्ञारखगान्हियुग्मभपगोकन्याविलमेतियौ ॥ व्यकौ
जेसदिशिप्रणम्यखगमुमुख्यान्सिताच्छादन स्वर्णोद्वृष्टहलसमुष्कमुदपे सौम्यापदुस्त्रिर्नयेत् ॥ ५ ॥

नि द्विपंविज्ञात्वा इंद्रोरग्येष्ठा लघुभानिप्र० स्वाष्ट्रचित्रातेर्म्यार्किज्ञारखगाहि मार्किज्ञानिः ज्ञायुषः आरोमोमः विगताआर्किज्ञारापेक्ष्यस्ते तथातेचतेखगाश्चतेषांमध्यदिनतस्मिन् ज्ञानियुक्तमोमरहितवारेऽत्यर्थं युग्मभपगोकन्याविलग्ने युग्मंमिथुनम् भगोमीन गोवृषः कन्याप्रसिद्धा पूषाग्यतमविलग्ने तियौ म्यंकौजे विगत अंक नवमीपरमात्असौम्यंकः सचासौओजश्च ओजोविषमस्तस्मिन् नवमीव्यतिरिक्तविषमातिथावित्यर्थं किंखगेम्यकौजेतिथौ सतिशि दिग्दशमीतिथासहवर्तमाने १,३,५,७,११,१३,१५,१० कपिशुगास्यात् तथाचोक्तम् ॥

चंद्रेशुभेशुभतिथौशुभवारयोगेवारेगुरौशशिजशुक्रगभास्तिवारे ॥ लग्नेवृषेमिथुनकेक्षपकन्यकायांशस्तंकृषिप्रकरणप्रवपेन्निधानइति ॥ अन्यच्च ॥
दशम्येकादशीचैवतृतीयाचत्रयोदशी ॥ सप्तमीपंचमीचैवप्रतिपच्चसुखावहा ॥ हत्यष्टमीवलीवर्दान्नवमीसस्यघातिनी ॥ चतुर्थीकीटजननीपतिं
हंतिचतुर्दशी ॥ रवौवृहस्पतौचंद्रेशुक्रेकुर्याद्विशेषतः ॥ बुधार्किभूमिपुत्राश्चनभवंतिफलप्रदाइति ॥ अथविधिमाह सिताच्छदनः श्वेतवस्त्रधरः
पटुःकुशलःकर्ताखगभूमुख्यान्देवान्प्रणम्य कृष्यारंभ पूर्वोक्तः सीतायज्ञःक्रियतेतत्रपूजितान्खगभूमुख्यान् ग्रहभूम्यश्यादीन् प्रदक्षिणापूर्व
कप्रणम्य मनोवाक्कायकर्मभिर्नमस्कृत्वा स्वर्णोद्घृष्टहलंसुवर्णघर्षितायहल समुष्कसुवृषैः मुष्कावृषणास्तैःसहवर्तमानाःसमुष्काः शोभनाः वृषा
सुवृषाःगुणावयवपूर्णाःनिरोगाः समुष्काश्चतेसुवृषाश्चतथातैःकृत्वा सौमींउत्तरादिशंप्रतित्रिवारनयेत् हलेनपद्धतीःकुर्यादितिभावः उत्तरादि
शंप्रतित्रिवारनयनेनपचरेखाउत्पद्यते तद्यथा प्रथमगमनेनैका आवर्तनेद्वितीया पुनरुत्तराप्रतिद्वितीयगमनेनतृतीया पुनरावर्तनेचतुर्थी पुन
रुत्तराप्रतितितृतीयगमनेनपचमीरेखाउत्पद्यते अधिकानकार्याइतिभावः सौमींपटुस्त्रिर्नयेदित्यत्रपटुपदग्रहणंअखडऋजुरेखाकरणार्थम् त
थाचोक्त ॥ शस्तासुचंद्रतारासुशुचिःशुक्लेनवाससा ॥ स्नात्वागंधैश्चपुष्पैश्चपूजयित्वाविशेषतः ॥ पृथिवींग्रहसंयुक्तापूजयित्वाप्रजापतिम् ॥ अ
ग्निंप्रदक्षिणीकृत्यदातव्याचैवदक्षिणा ॥ कृष्णोवृषोनियोक्तव्योजीवनश्चयुतेनवा ॥ विबलंछिन्नलागूलंकपिलवृषभंत्यजेत् ॥ हलप्रवाहनंकार्यं
नीरुग्भिर्वृषकर्षकैः ॥ हलादिभिर्दृढैःक्षेमकृद्दृढैरशुभंभवेत् ॥ वृषभागदियुध्येयुस्तस्यविघ्नसदाभवेत् ॥ हेमघृष्टहलाग्रेणछिन्नरेखानकारयेत् ॥

मोमयोरप्यतमेतत्तीत्पर्थः पस्मिंश्चन्द्रेसेवाक्षिपतेतरमाच्चन्द्राद्दशमेएकादशेवारवौम मेवासतिसेवाइष्टाहितकरास्यादित्यर्थ शेषंप्राग्वत् अथ चतुर्थचरणेनसम्पासमाह सम्पासइति स्थिरनक्षत्रेस्थिरलग्नेचसंन्यासइष्टःस्यात् केःस्वर्लेर्गतबलैः पापग्रहैर्हीनबलैरित्यर्थः सप्तम्पर्येतुतीया कस्मिन्ताति मार्गवे शुक्रेषष्ठपंत्यगे६,१२सवि शेषंलग्नबलंप्राग्वत् उक्तच ॥ मिषढेकादशेसोर्म्यंपेपष्ठेचमार्गव ॥ सबलेधर्मपेजीवेकेंद्रेदीक्षामि रक्तिकदिति ॥ ४ ॥ अथक्तहपेनकर्मिकर्माह उद्राहेति उद्राहर्क्षाणिपूर्वोक्तानि मूलात्सार्केत्पादीनिएकादशसंख्याकानि चराणि प्रसिद्धा

उद्राहर्क्षेचरद्विपेंद्रलघुभत्वाष्टैःशुभास्पात्कपिव्यार्किस्तारस्वगान्हियुग्मझषगोकन्याविलमेतियौ ॥ व्यकौ जेसदिशिप्रणम्यखगभूमुख्यान्सिताच्छादन स्वर्णोद्घृष्टहलंसमुष्कमुदयै सौमीपदुस्त्रिर्नयेत् ॥ ५ ॥

नि द्विपविशारवा इंद्रोग्येष्ठा लघुमानिप्र० स्वार्क्षचित्रातैर्व्यार्किस्तारस्वगान्हि आर्किःशनिः क्षानुषः भारोमौमः विगताआर्किस्तारापेक्ष्यस्ते तथातेचतेस्वगाश्चतेषांमहःदिनतस्मिन् क्षानिभुषमौमरहितवारेइत्यर्थः युग्मझषगोकन्याविलग्ने युग्ममिथुनम् झषोमीनः गोर्वृषः कन्याप्रसिद्धा एषामन्यतमविलग्ने तिथौ व्यंकौजे विगतःअंकःनवमीपरमात्असौव्यंकः सचासौओजश्च ओजोविषमस्तस्मिन् नवमीव्यतिरिक्तविष मातिथावित्यर्थः किंलक्षणेव्यंकौजेतिथौ सदिशि दिग्दशमीतिथासहवर्तमाने १,३,५,७,९,११,१३,१५कपिशुगास्यात् तथाचोक्तम् ॥

णःइद्रोजेष्ठाविगताःवारुणहरिद्रायेभ्यस्तानितथातैः शततारकाश्रवणज्येष्ठारहितैरित्यर्थः ऋषिभैरित्युपलक्षणम् तस्मात्कृष्युक्तंसर्वतिथि
वारादिकज्ञेयम् तथाचोक्तम् ॥ मूषकानांभयभौमेमदेशलभकीटयोः ॥ नवमेचतिथौरिक्तेहीनसोमेविशेषतः ॥ वृषलग्नेथवामीनेकन्यायामि
थुनेथवा ॥ वापयेत्सर्वसस्यानियदीच्छेत्सस्यसंपदइत्यादि ॥ लग्नबलप्राग्वत् अथबीजवापविषयेहिभेदफणिचक्रमाह सूर्यर्क्षादिति सूर्ययु
क्तनक्षत्रादितृतीयम् तस्मादतिधृतिरेकोनविंशम् तस्मात् अष्टाष्टाभैः तृतीयादष्टाभिः एकोनविंशादष्टभिर्नक्षत्रैर्बीजवापःसत्फलः अथद्वितीय

सूर्यर्क्षादितृतीयतोतिधृतितश्चाष्टाष्टभैःसत्फलःप्रोक्तोन्यैःफणिसप्तमाद्रविमितैस्तच्छेदनंवापभैः ॥ ६ ॥

भेदमाह अन्यैरिति अन्यैराचार्यैः फणिसप्तमात् राहुसप्तमात्सकाशात् रविमितैर्द्वादशभिर्नक्षत्रैः बीजवापःशुभःप्रोक्तः एतदुक्तंभवति राहुर्य
स्मिन्नक्षत्रेभवति तस्मात्यत्सप्तमनक्षत्रंतत्फाणिसप्तममुच्यते तस्मात्सकाशात्द्वादशभिरित्यर्थः राहोस्तुफणीतिनामग्रंथातरेप्रसिद्धम् वराह
मिहिराचार्येणराहुस्वरूपविकल्पाग्रंथातरोक्ताउद्धाटिताःस्वकृतसंहितायाम् ॥ अमृतास्वादविशेषाच्छिन्नमपिशिरःकिलासुरस्येदम् ॥ प्राणैरपरि
त्यक्तग्रहतायातवदत्येके ॥ इंद्वर्कमडलाकृतिरसितत्वात्किलनदृश्यतेगगने ॥ अन्यत्रपर्वकालाद्दरप्रधानात्कमलयोनेः ॥ मुखपुच्छविभक्तागंभुजंग
माकारमुपदिशंत्यन्येइति ॥ भुजगमाकारकथनात्फणीत्यभिधानंप्रसिद्धम् रत्नमालायामपि ॥ फणिभाद्बीजोप्तिकालेस्फुटमिति॥तथाचागमातरे

उत्तराभिमुखोमूत्वाक्षीरेणार्घ्यप्रदापयेत् ॥ तत्पत्रंसर्वप्रकारेणनिर्विमंकारयेत्तदा ॥ एकाजपकरीरेवाहुतीपाचार्यदद्दिदा ॥ पंचमीचमवेद्रेत्रा बहुसस्यफलप्रदा ॥ अतऊर्ध्वनकर्तव्यामहादोषस्ततोभवत् ॥ रमर्तव्याश्वसवःशुक्रःपुनामासुचद्रमा ॥पराशरोहलीचैवसर्वविप्रोपशांतपद्दति ॥ अथवुर्निमित्तानितभेवोकानि हलेप्रवाह्यमाणेतुकर्मउत्पद्यतेयदि ॥ गृहिणोमृतयेतस्यतस्तोग्रेश्रमयमवेत्॥ ईषामगोपदाकृष्टुसशयोजीवितस्यच सुतनाशोयुगेमग्रेसमानम्रियतेशिशु ॥ योकच्छेदेवुव्यासग सस्यहानिश्चजायते॥ हलेनवाह्यमाणेवुगोरेकःप्रपतेयदि॥प्रपतेयुक्तमात्रस्तुधनंचप्र

त्रित्रित्रीष्वनलार्यरामहुतभुक्भेष्वर्कभुक्तादसत्सद्भूय कृपिभैर्विवारुणहरींद्रैर्वीजवाप शुभः ॥

यच्छति ॥ ज्वरातिसाररोगेणकृपिभंगंविनिर्दिशेत् । प्रथमेयुक्तमात्रस्तुततोगोःस्वनतेयदि ॥ हलेनयुक्तमात्रस्तुतदासस्यचतुर्गुणमिति ॥५॥अथ कृपिभिपपेलांगलचक्रमाह त्रित्रीति अर्कभुक्तात्सूर्यभुक्तनक्षत्रात्सकाशात् त्रिण्यादिपुस्थानाष्टस्थितेपुनक्षत्रेषु असत्सदित्येतत्फलद्वयमूयः वारंवारंस्यात् एतदुक्तंभवति सूर्यार्कालनक्षत्रस्यआदिमाचक्षत्रात्सकाशात् त्रिपुअसत् दुष्टफलंस्यात् तदनंतरं त्रिपुसत्शुभंस्यात् ततस्त्रि पुअसत् ततश्चपुपुर्पचसुसत् ततोनवेषु त्रिपुअसत् ततःअर्थेषु पंचसुसत् ततोरामेषु त्रिपुअसत् ततोहुतभुक्षुत्रिपुसत्स्यादित्यर्थ अथबीजोक्तिमाह कृपिभैरिति कृपिभैःकृपिनक्षत्रैः उद्दाहर्क्षचरद्विपेत्यादिभिर्बीजवापःशुभःप्रोक्तः किंलक्षणैःकृपिभैः त्रिवारुणहरींद्रैः वारुणंशततारकाहरिःश्रव

णःइद्रोजेष्ठाविगताःवारुणहरिद्रायेभ्यस्तानितथातैः शततारकाश्रवणज्येष्ठाराहितैरित्यर्थः कृषिभैरित्युपलक्षणम् तस्मात्कृष्युक्तंसर्वंतिथि
वारादिकंज्ञेयम् तथाचोक्तम् ॥ मूषकानांभयंभौमेमंदेशलभकीटयोः ॥ नवमेचतिथौरिक्तेहीनसोमेविशेषतः ॥ वृषलग्नेथवामीनेकन्यायामि
थुनेथवा ॥ वापयेत्सर्वसस्यानियदीच्छेत्सस्यसपदइत्यादि ॥ लग्नबलप्राग्वत् अथबीजवापविषयेद्विभेदफणिचक्रमाह सूर्यर्क्षादिति सूर्ययु
क्तनक्षत्रादितृतीयम् तस्मादतिधृतिरेकोनविंशम् तस्मात् अष्टाष्टाभेः तृतीयादष्टाभिः एकोनविंशादष्टभिर्नक्षत्रैर्बीजवापःसत्फलः अथद्वितीय

सूर्यर्क्षादितृतीयतोतिधृतितश्चाष्टाष्टभैःसत्फलःप्रोक्तोन्यैःफणिसप्तमाद्रविमितैस्तच्छेदनंवापभैः ॥ ६ ॥

भेदमाह अन्यैरिति अन्यैराचार्यैः फणिसप्तमात् राहुसप्तमात्सकाशात् रविमितैर्द्वादशभिर्नक्षत्रैः बीजवापःशुभःप्रोक्तः एतदुक्तंभवति राहुर्य
स्मिन्नक्षत्रेभवति तस्माद्यत्सप्तमनक्षत्रंतत्फणिसप्तममुच्यते तस्मात्सकाशात्द्वादशभिरित्यर्थः राहोस्तुफणीतिनामग्रंथांतरेप्रसिद्धम् वराह
मिहिराचार्येणराहुस्वरूपविकल्पाग्रंथांतरोक्ताउद्घाटिताःस्वकृतसंहितायाम् ॥ अमृतास्वादविशेषाच्छिन्नमपिशिरःकिलासुरस्येदम् ॥ प्राणैरपरि
त्यक्तग्रहतायातंवदत्येके ॥ इंद्वर्कमंडलाकृतिरसितत्वात्किलनदृश्यतेगगने ॥ अन्यत्रपर्वकालाद्वरप्रधानात्कमलयोनेः ॥ मुखपुच्छविभक्तागंभुजंग
माकारमुपदिशंत्यन्येइति ॥ भुजगमाकारकथनात्फणीत्यभिधानंप्रसिद्धम् रत्नमालायामपि ॥ फाणिभाद्बीजोक्तिकालेस्फुटमिति॥तथाचागमातरे

॥ राहुमादष्टमंयावद्बीजोप्तिःपरिवर्जयेदिति ॥ अथवान्यच्छेदनमाह तच्छेदनंवापभैरिति तेषांधान्यानांछेदनंतच्छेदनम् वापभे बीजवापनक्षत्रैः प्रोक्तम् ननुपस्यांगपददोंगिनोगवितमकुपादितिपुरोवाक्तम् तत्कथंपुनरुक्तंनच्छदनवापभैरिति सत्यम् क्वापिनक्षत्राणांबीजवादननक्षत्राणांच किंचित्भेदोस्तिह्यपोरुच्यगत्वात् केःकार्यमितिसंदेहनिवारणार्थंतच्छेदनवापभैरित्युक्तम् ॥ ६ ॥ अथनिष्पन्नधान्येकमप्राप्तमधिरोपणंवृ त्तचरणनाह मेथिमिति क्षीरतरावटवृक्षादर्मेथिंउद्वाहभैर्विवाहनक्षत्रैर्मूलात्पार्केत्यादिभिरारोपयेत् निरूपनेत् मेथिर्नामस्वलेधान्यमर्दनार्थं

मेथिंक्षीरतरोरुफानुरहितैरुद्वाहभैरोपयेदन्नप्राशनवद्वसतशरदो प्रोक्तंनवान्नबुधै ॥

वृषपक्तियोजनार्थंकाष्ठमारोप्यते मेध्यतेसंगम्यंतेवृषमाअस्मिन्नि तिमेथिः "पुंसिमेथिःस्वलेदारुम्यस्तंयत्पशुबधनइत्यमरः" किंलक्षणेरुद्वाह भैःउफानुरहितैः उफाउत्तराफाल्गुनी अनुःअनुराधाताभ्यांरहितैः उक्तंच ॥ रेवतीरोहिणीमूलं स्वातीहस्तोमृगस्तथा ॥ आषाढोत्तराहस्तश्चत थाभाद्रपदामता ॥ वपनेसर्वबीजानांतथाशालाप्रवेशने ॥ मृ स्वदावनदाषैवानुराधोत्तरफाल्गुनी वटश्चसप्तपर्णश्चगंभारीशाल्मलीतथा ॥ औ दुंबरीतथाधात्रीपाचाम्याक्षीरवाहिनी ॥ क्षीरवाक्षी वंकेनित्यमधि कार्यफलप्रदेति ॥ अथनवधान्यप्रसंगेननवान्नकर्मेहतीयचरणेनाह अन्न प्राशनमारिति वसंतशरदोःऋत्वोः अन्नप्राशनमेवान्नंनवान्नकर्मबुधैःप्रोक्तम् अन्नप्राशनमारित्युपलक्षणं तस्मादन्नप्राशनोक्तितिथिवारादिक

मत्रग्राह्यम् साग्निकस्यनवाग्निकर्मणाविनाव्रीह्यादीनांनवनवमितानांधान्यानांभक्षणेदोषप्रसंगादावश्यककमेतत् नवधान्यानामान ॥ व्राहया यवगोधूमानीवारा कगुवेणका. ॥ शालयोमुद्गमाषा नवधान्यानिचक्रमात् ॥ एषामध्येशरत्सभवानिधान्यानिव्रीह्याग्रयणेनविनानभक्षणीयानि वसतभवानियवाग्रयणेनविनानभक्षणीयानीतिनियमादिकर्मशारद्दसंतयोःक्रियतइतियत्ततत्ऊनप्राशनोदितैस्तिथिभादिभिः मासेषष्ठेष्टमेवेत्य त्रोक्तैर्नवान्नकर्तव्यमित्यर्थः अथोत्तरार्द्धेननृत्यसंगीतयोरारंभमाह मैत्रार्कोत्यवसूत्तरेज्यवरुणेसेंद्रैःशुभंनर्तनंलग्नेज्ञेगुरुवीक्षितेहिबुकगैःसौम्यैश्चसंगीतकम् ॥ ७ ॥

मैत्रार्कोत्यवसूत्तरेज्यवरुणेःसेंद्रैःशुभंनर्तनंलग्नेज्ञेगुरुवीक्षितेहिबुकगैःसौम्यैश्चसंगीतकम् ॥
ह्रीशार्केंद्रदितीज्यवासवशिवाश्व्यंत्याग्निपार्शाद्रभैःपूर्वाभिःशुभदाविसिंहभतनौनानापशूनांक्रिया ॥

स्तिस्रः ईज्यःपुष्यः वरुणःशततारका इंद्रोज्येष्ठा तैर्नर्तनमारभेत् संगीनकंचआरभेत् कस्मिन्सति लग्नेवर्तमानेज्ञेगुरुवीक्षितेसति कैः हिबुकगैः सौम्यैः चतुर्थस्थानास्थितैःसौम्यग्रहैः शेषप्राग्वत् ॥ ७ ॥ अथनानापशूनाकर्मवक्तेनैकेनाह ह्रीशेति ह्रीशंविशाखा अर्कोहस्तः इंदुर्मृगः अदि
तिःपुनर्वसुः ईज्यःपुष्य वासवोधनिष्ठा शिवःआर्द्रा अश्विनीप्रसिद्धा अंत्यरेवती अग्नि कृत्तिका पार्शीशततारका इंद्रोज्येष्ठा तैःपूर्वाभि
स्तिस्राभिः विसिंहभतनौ विगतःसिंहोयेभ्यस्तानिविसिंहानितानिचतानिभानिविसिंहभानिसिंहरहितराशयःतेषातनुःलग्नतास्मिन् नानापशूना

क्रियाशुभदाउदिता पशूनांक्रयविक्रयादिकर्मशुभदंप्रोक्तमित्यर्थः अथोत्तरार्धेनवर्ज्यमाह अर्कंचतुर्पुवारेषु रविचंद्रभौमबुधवारेषु कोत्तरहरि
त्राम्रूषु कृशाहिणी उत्तरास्तिस्र आसांसमाहार कोत्तरं हरिःश्रवणः स्वाष्ट्रंचित्रा एषु अमारिक्तयोः अमाअमावास्या रिक्ताचतुर्थीनवमीचतु
र्दशीनामन्यतमा तथोः अष्टमीप्रसिद्धा तस्यांनानापशूंक्रियाहितानउदिता अपवादमाह स्वस्वगभेसतिभदोषोनक्षभदोषः क्वचित्पशुकर्मणि
नस्यात् छत्रमलंप्राग्वद् उक्तंच ॥ ह्यादित्यद्विवसुद्व्यांत्यर्केंद्वहीशोःक्रियादिगोः ॥ दर्शाभूताष्टमीचित्राध्रुवकर्णेगमाधसत् ॥ सोमार्कवैधृतीपा

वारेष्वर्कंचतुर्पुकोत्तरहरित्वाष्ट्रेष्वमारिक्तयोष्टम्यानहितोदितास्वभगभेनस्याद्भदोप किल ॥ ८ ॥
ह्यादित्यद्विवसुस्थिराश्विभमृदुस्वात्यर्कभैर्मैत्रयार्कारान्हीज्यभृगूदयेद्विकमदेष्विंदौक्रियाश्वीहिता ॥

तेलप्रेपंचाननेवुधे ॥ भद्रासंक्रांतिरिक्तासुपशुकर्मविवर्जयेत् ॥ शुभग्रहोदयेशुद्धनेभनेस्वक्षयोनिषु ॥ रक्षाहिद्विक्रियाशस्तापशूनांमुनिभिः स्मृतेति॥
तथाचागमांतरे ॥ सोमेसौमेबुधेगामोनघास्यास्तुरगाःशानाविति ॥ अन्यच्च ॥ पूर्वाभपामृतमपूषवसुताशनेपुशक्राग्निधाजिवसुवारुण्शांकरेषु॥एते
पुगोमहिषिपंतितुरंगमादिनानाप्रकारपशुजातिगतिःप्रशस्तेति ॥ ८ ॥ अथाश्वकर्मसप्तकेनाहह्यादित्यादिस्थेतिह्यादित्यंपुनर्वसुपुष्यो द्विवसुधनिष्ठाश्व
तवारके स्थिराणिप्रसिद्धानि अश्विनीप्रसिद्धा मृगुभिप्रसिद्धानि स्वातीप्रसिद्धा अर्कोहस्तः तेऽश्वपार्कारान्हिज्यभृगुस्थुक्रा॰ अर्कःसूर्यः आ

रोभौमः एषामहःदिनंतस्मिन् ईज्यभृगूदये उदयेलग्नेईज्यभृगोइतिईज्यभृगूदयम् तस्मिन् गुरुशुक्रयुतेलग्नेइत्यर्थः द्विकमदेपुङदौ द्विहितीयं क
चतुर्थम् मदःसप्तमम् एषुचंद्रेसतीत्यर्थः अश्वीक्रिया क्रयविक्रयादिकीहिताशुभकर्त्रीस्यात् अथाश्वचक्रमाह तत्रापीति तत्रापि हयादित्या
दिषुनक्षत्रेषुसत्स्वपि अर्कभतःसूर्यनक्षत्रात्सकाशात् क्रमात्तिथिमितैर्नक्षत्रैः पश्चादुत्क्रमतस्त्रिभिर्नक्षत्रैः साभिजित्यथातथा अश्विनीक्रियाश
स्ताशोभनास्यात् एवंसामान्यतोश्वकर्मोक्तेदानींविशेषमाह येति याअश्वीक्रियानृसमामनुष्यसदृशासाक्रियातदुक्तभमुखैःकार्या तस्मैमनु

तत्राप्यर्कभतःक्रमात्तिथिमितैःपश्चात्त्रिभिःसाभिजिच्छस्तायानृसमातदुक्तभमुखैःकार्याधरौभर्बुधैः ॥ ९ ॥

ष्यायउक्तानिभमुखानिनक्षत्रादीनितैःकार्येत्यर्थः परायानृसमानभवतिसाएभिःसामान्यैहयादित्यादिभिर्बुधै.कार्येत्यर्थः लग्नबलप्राग्वत् त
थाचनारदः ॥ विविष्णुचरभेक्षिप्रेमृदुभेस्थिरभेषुच ॥ वाजिकर्माखिलंसूर्यवारेकार्यविरोषतइत्यादि ॥ तथाचोक्तम् ॥ घृतान्नचणकक्षीरतृणमु
द्गादिभक्षणे ॥ अन्नप्राशनवदक्षखानंसौम्यग्रहोदये ॥ चौलेक्षुरकर्मादाभेपजेभेषजोदितम् ॥ गर्भाधानोक्तमश्वानामैथुनेनुश्लोकयेत् ॥ गृ
हारंभोदितेकालेहयशालाविधीयते ॥ शिक्षावियोक्तकालेचभूषणंभूषणोदिते ॥ चर्मकर्मादिककार्यंजययोगेशुभोदये ॥ एवंखरोष्ट्रादिकंकार्यं तु
र्वाण्हेवाहनादिकमिति ॥९॥ अथाभ्यंगनिषिद्धकालमाह भद्रेति भद्राप्रसिद्धा सक्रमःसक्रांतिः पातोव्यतीपातः वैधृतिःप्रसिद्धा सित·शुक्रवारः

इज्यागुरुवारः अर्कोरविवारः भारोमौमवासरः षष्ठ्यादय सर्वास्तिथयः तासुश्राद्धाहःश्राद्धदेनं प्रतिपदृ्यप्रतिपदृितीयेतस्मिन हेतुंकारणं
विनाअभ्यंजनंअभ्यंगंपरिहरेत् कारणेसतिअवश्यंचरेदित्यर्थासिद्धम् तथाचोक्तम् ॥ स नम्यांनरष्टशतेलंनवम्यांप्रतिपात्तथो ॥ चतुर्दश्यामथाष्ट
म्यांपष्ठ्यांचैवविशेषतइति । अंथांतरे ॥ चतुर्दश्यष्टमीचैवपौर्णिमास्यर्कसंक्रम ॥ तैलस्त्रानंनकुर्वीतसुतबंधुधनक्षयादिति ॥ तथाचब्रह्ममनुः॥ दर्शो
स्त्राननकुर्वीतमातापित्रोस्तुजीवनो ॥ नवम्यांचनचैत्रस्यनिमित्तांतरसंभवः ॥ प्रतिपद्यनपत्यःस्याद्वितीयायामपत्निक ॥ दशम्यामथन स्नाने

भद्रासक्रमपातवैधृतिमितेज्यार्कारपष्ठ्यादिषुश्राद्धाहेप्रतिपद्द्वयेपरिहरेद्धेतुंविनाभ्यजनम् ॥ मागल्य
विजयोत्सवोब्दवदनदीपावलिर्हेतवोभ्यगस्यक्रियादितैलमनसाग्निधेन्हिनित्येऽखिलम् ॥ १० ॥

सर्वेहतिथयोदशमीति ॥ रत्नमालायाम् ॥ रविस्तापंक्रांतिंविसरतिशशिंभूमितनयोमूर्तिलघमींचांद्रि सुरपतिगुरुर्वैत्तहरणम् ॥ विपत्तिंवैन्यानांगुरु
रखिलभोगानुभवननृणांतैलाभ्यगारंपदिकुरुतमूर्धंतनपद्मांति ॥ अथाभ्यगहेतूनाह मांगल्यंविवाहादि विजयोत्सवआश्विनशुक्लदशम्यांकि
यते अब्दवदनंसवत्सरप्रतिपत् दीपावालःप्रसिद्धा एतेभ्यगस्यहेतव कारणानि पुनिषिद्धतेभ्यावावीपअभ्यंगःकर्तव्यः तथाचोक्तव्यवहार
सारे वत्सरादौवसवादोसूतकांतेमहोत्सवे ॥ दीपोत्सवचतुर्दश्यामभ्यंगनियमोनचेति ॥ तथाचोक्तस्कांदेविजयावशमीविषयम् ॥ निषिद्धमपि

कर्तव्यतैलाभ्यंजनमादरादिति ॥ अथाभ्यगनिषिद्धाषवादमाह क्थितादिति निंद्येन्हिक्थितादितैलंअनसच्छुभस्यात् आदिग्रहणात्सार्षपसु
गवपुष्पवासितादितैलगृह्यते एवक्थितादितैलनिंद्यादिनेपिशुभमित्यर्थः उक्तंच ॥ सार्षपगंधतैलंचयत्तैलपुष्पवासितम् ॥ द्रव्यांतरयुतवापिनदु
ष्यतिकदाचन ॥ सूर्यशुक्रारवारेषुनिषिद्धासुतिथिष्वपि ॥ कर्त्तव्येयदिवाखानेपक्तैलनदुष्यति ॥ रवौपुष्पगुरौदूर्वाभौमवारेचमृत्तिका ॥ भा
र्गवेगोमयंक्षिप्त्वातैलस्नानंसुखावहमिति ॥ अथनित्याभ्यंगेविशेषमाह नित्येखिलमितिनित्येऽभ्यंगेअखिलतैलंपक्वादिकअनसत्शुभंस्यात् उ

दिग्विश्वाद्रिद्दगंकदर्शीतिथिषुस्नानंनधात्रीफलैःश्रीकामोथबुधांबुपर्क्षेपितृभाभ्यंगापतिघ्न्यंगना ॥

क्तंच ॥ नित्यस्नानेचकर्तव्येतिथिदोषोनाविद्यतइति ॥१०॥ अथप्रसंगेनातिलामलकस्नानेनिषिद्धतिथीनाह दिगिति दिक्दशमी विश्वेत्रयोदशी
अद्रिःसप्तमी दृक्द्वितीया अकोनवमी दर्शोंअमावास्या एतासुतिथिषुश्रीकामःधात्रीफलैः आमलकीफलैः स्नानंनाचयेत् तथचोक्तम् ॥ य·
करोतिदशम्यांचस्नानमामलकैःसह ॥ पुत्रहानिर्भवेत्तस्यत्रयोदश्यांधनक्षयः ॥ अर्थपुत्रक्षयस्तस्याद्वितीयायांनसंशयः ॥ अमायांचनवम्याच
सप्तम्याचकुलक्षयइति ॥ अथस्त्रीणाबुधादिषुअभ्यंगनिषेधमाह बुधोबुधवारः अबुपर्क्षंशततारका पितृभमघा तेषुअभ्यंगस्तस्मात्अंगनास्त्रीप
तिघ्नीस्यात् उक्तंच ॥ स्नानंकुर्वंतियानार्यश्चद्रेशताभिषग्गते ॥ सप्तजन्मभवेयुस्ताविधवादुर्भगाध्रुवमिति ॥त्रिविक्रमशते ॥ स्नानंनारार्कशुक्रेज्यावि

पितसक्रांतिपर्वसुश्लेषाद्यष्टपट्दिक्षयोदश्पांत्रिपत्नुनमघायुवैः॥अथपुष्यवतःसोमवारेप्यंगनिषेधमाह पुषीति पुष्यवान्सोमवारेनस्नायात् उक्तच
॥ पुष्यवान्स्वगृहेनित्यंनस्नायादुत्तरामुखः ॥ सोमवारेतथाप्यंगंवर्जयेत्सर्वथापुष्यइति ॥ अथाप्रसवेनप्रसूतिकास्नानेनिषेधकालमाह प्रसूरिति य
मोमरणीपितरोमघा त्याम्रूचिषा इंद्रोज्येष्ठा मित्रेरुत्तिकाविशास्ते अंबुपश्चाततारा कुम्भावोमूलं ईश्वरमाद्रा पर्पासमाहारस्तास्मिन् कुपुत्रह
रिजे कुत्सितपुत्रःपुत्रभावोयस्यतत्कुपुत्रंतच्चतद्हरिर्जचतस्मिन् यस्माद्धात्पचमस्थःपापमहोभवतितस्मिन्नित्यर्थः निशास्पराभिमुखंसापका

पुत्रीसोमदिनेप्रसूर्यमपितृत्वाष्ट्रेंदुमित्रांबुपक्रव्यादेश्वरभेकुपुत्रहारिजेस्नायान्निशास्योपिन ॥ ११ ॥
मदारान्पदिनेमृदुध्रुवचरक्षिप्रैर्बलक्षेसुधायोगेभेषजमाचरेत्सुमृतिर्केद्वारिव्ययागेभिषक् ॥

लस्तास्मिन् प्रसूतानस्नायात् शोपलप्रबलंप्राग्वत् उक्तच ॥ मघामूलविशास्वार्द्राश्विभादितियमह्वये ॥ ज्येष्ठासार्पजलेशर्क्षेनैवस्नायात्प्रसूतिका॥
शुभमहपुतेबलग्रेपंचमेपापवर्जिते ॥ परित्यज्यमहादोषान्सूतिकास्नानमाचरेत् ॥ ११ ॥ अथौषधनिष्पादनमाह मंदेति मंदःशनिःआरोभौमःता
भ्यामन्येरविचंद्रबुधगुरुशुक्रास्तेषांदिनंतस्मिन् मृदुध्रुवचरक्षिप्रैर्नक्षत्रैः बलक्षेशुक्लपक्षे सुधायोगेअमृतयोगे यथांतरप्रसिद्ध सुमृतिर्केद्वारिव्ययागे
शोभनानिपापग्रहरहितानिसुमृतिर्केद्वारिव्ययानियस्यवत्सुमृतिर्केद्वारिव्ययंचयत्तत्अंगंचतस्मिन् भिषक्वैद्यः भेषजमाचरेत्कुर्यात् शोपलप्रबलं

प्राग्वत् अथौषधदानमाह तदिति तदौषधंइहानंतरोक्तेभादौदद्यात् कथंभूतेइह विध्रुवेंदुतनयप्रद्योतनेध्रुवनक्षत्रबुधरविरहिते अथरक्तस्रावव्रण योर्विशेषमाह असृक्स्रावोरक्तस्रावः व्रणःक्षतम् अनयोःकर्मसूर्यकुजयोरन्हिदिवसेआचरेत् कयोःसतोः इहानयोः सूर्यकुजयो.केंद्रस्थयोः सतोः तथाचोक्तम् ॥ मदारवर्जितेवारेचरक्षिप्रमृदुध्रुवैः ॥ सूर्यसौम्यःकेंद्रगतैर्भेषजोत्पादनंहितम् ॥ रक्तस्रावंकुजेकुर्यात्तद्धोरायामथापिवा॥कुजे केंद्रेऽथवामंदेरवौवाविखलेष्टमे ॥ व्रणक्रियाकुजेसूर्येकेंद्रगेतद्दिनेऽष्टमे ॥ शुद्धेपष्ठेचसक्रूरेचरलग्नेयुवस्वरइति ॥ १२ ॥ अथप्रसगेनरोगमुक्तिदिव

तद्वद्यादिहविध्रुवेंदुतनयप्रद्योतनेरोगिणेसृक्स्त्रावव्रणकर्मसूर्यकुजयोरन्हीहकेंद्रस्थयोः ॥ १२ ॥
याम्यात्रियवायुमूलजलपोपांत्येंद्रहस्तांबुभेशांत्याजाद्विपयोर्नृपैर्नवदिनैरन्यत्ररुग्णोविरुक् ॥

सानाहवृत्तार्द्धेन याम्यमिति ॥ याम्यभरणी अहित्रयं आश्लेषात्रय वायुःस्वाती मूलंप्रसिद्धम् जलपःशततारका उपात्यउत्तराभाद्र• इंद्रो ज्येष्ठा हस्तःप्रसि• अंबुभंपूर्वाषाढा अस्मिन्नक्षत्रगणेरुग्णःरोगीशांत्यायथोक्तशांतिकेनविरुक्ज्वरमुक्तोभवति अजाद्विपयोः श्रवणविशाखयोः रुग्णःनृपैःषोडशाभिर्दिनैःविरुक्स्यात् अन्यत्रअन्येषुनक्षत्रेषुरुग्णोनवदिनैर्विरुक्भवति एतज्ज्योतिषार्काभिप्रायंकिंचिद्बलकोशाभिप्रायमुक्तम् तत्रपेषुनक्षत्रेषुज्वरितस्यमृत्युरुक्तःयेषुचरुच्छ्रेणवद्भुभिर्दिनैःज्वरमुक्तिरुक्तातत्फलमत्रशांत्यविरुगित्युक्तम् क्वचिदन्यथाफलदर्शनात् तथायेषु

